# प्रस्तावना

ऋग्वेदसंहिता न केवलं भारतीयानां प्राचीनतमः ग्रन्थः, परन्तु निखिले जगति परमप्राचीनः धर्मग्रन्थः इति बहूनां विदुषां मतम् । परस्सहस्रवर्षव्याप्तियुक्ते भारतीये अध्यात्मसम्प्रदाये परिगणिताः सर्वा विद्याः समग्रं ज्ञानं विज्ञानं च ऋग् यजुस् सामाथर्व इति चतुरङ्गयुक्ते वेदवाङ्मये रूढमूलानि परिदृश्यन्ते । वेदसंहितानन्तरं प्राप्तप्राचुर्याः ब्राह्मणग्रन्थाः उपनिषदश्च उच्चैर्घोषयन्ति यत् साङ्ख्ययोगादीनि दर्शनानि सकला यागप्रक्रियाः छन्दः गणितादीनि शास्त्राणि च संहितायामेव विद्यमानानां बीजानां प्रसवरूपाणि इति ।

बहुधा दृश्यमानस्यापि लिङ्गजातीत्यादिविभागमनपेक्षमाणस्य एकस्य सर्वव्यापिनः आत्मनः सत्ता इदं-प्रथमतया ऋग्वेदसंहितायामेव अक्षिलक्षितः भवति । सर्वैरपि साक्षात्कारयोग्योऽयम् आत्मेति उच्चैरुद्घोषयति ऋग्वेदः ।

यथा श्री अरविन्दो वदति ... 'they (the vedic sages) may not have yoked the lightning to their chariots, nor weighed sun and star, nor materialised all the destructive forces in Nature to aid them in massacre and domination, but they had measured and fathomed all the heavens and earths within us, they had cast their plummet into the inconscient and the subconscient and the super conscient; they had read the riddle of death and found the secret of immortality; they had sought and discovered the One and known and worshipped Him in the glories of His light and purity and wisdom and power...'

इतः परं श्री अरबिन्दोकपालिशास्त्रिवैदिकसंस्कृतिसंस्थया प्रकाशयिष्यमाणानां वेदसंहितानां ब्राह्मणानाम् उपनिषदां वेदाङ्गानां शुल्बसूत्राणां च पुस्तकपुष्पसरणेः प्रथमं पुष्पमिदम् ।

पाठकवर्गे त्रैविध्यं मनसिकृत्वा नयनमनोहरोऽयं ग्रन्थः सज्जीकृतः वर्तते । ते च त्रिविधाः पाठका उच्यमानप्रकाराः सन्ति । प्रथमं तावत् प्रारम्भपदे स्थिताः । गायत्री-गणपतीत्यादिकतिपयमन्त्राणां प्राप्तपरिचयाः सन्तः इतोऽप्यधिकं ज्ञातुं कुतूहलिनः । अपरे तु द्वितीयसोपानमधिरूढाः । एते परिचित-ऋङ्मन्त्राः नित्यपारायणार्थं स्वाध्यायार्थं च चित्ताकर्षकं पुस्तकमेकं हस्ते भवेदिति अभिलषन्ति । अन्ये तावत् चिकित्सकबुद्धयः जिज्ञासवश्च । एते भाषान्तरद्वारा, प्रवचनसन्दर्भेषु, चर्चाप्रसङ्गेषु च ऋग्वेदान्तर्गतसूक्तानां परोक्षपरिचयं प्राप्य सः वेदराशिः यागयज्ञादिकर्मकाण्डमात्रयुक्तः ज्ञानदुर्बलः इति ज्ञात्वा श्रुत्वा च तत्सत्यं वा न वेति प्रमाणीकर्तुं स्वयमनुसन्धानेन समीहन्ते । एतेषां भिन्नरुचियुक्तानां सर्वेषामपि साहाय्यार्थं प्रस्तुतः अस्मदीयोऽयं प्रयत्नः ।

अयं च ग्रन्थः इदानीमुपलभ्यमानेन गणकयन्त्रप्रक्रियासौलभ्येन समन्वितः वर्तते । प्रस्तावनासहितः कतिपयसूक्तानुवादयुक्तश्च समग्रः ऋग्वेदः जगत्संवहनजाले(Internet) उपलभ्यते । अनेन धनकणस्यापि अधिकव्ययं विना ऋग्वेदः सम्पूर्णः हस्तसन्निहितः ननु! वैविध्यमाध्यमचक्रे देवनागरीलिप्या ध्वनिसहितं मूलपाठं दातुम्, अन्यान्यलिपिषु भाषान्तरेषु च ऋग्वेदं दातुं च प्रयत्नाः प्रवर्तन्ते । मूलग्रन्थस्य गणकयन्त्रे स्थापनेन प्रयोजनबाहुल्यं दृश्यते । उदाहरणार्थं स्वल्पीभूतनेत्रपाटवानां कृते गणकयन्त्रे लिपिं स्थूलतां नेतुं बहु सुकरम् ।

स्वरसहितं वेदवाङ्मयं गणकयन्त्रान्तर्गतं कर्तुं मोहनताम्बेमहाभागस्य संशोधनं तदभिवृद्धिश्च हेतुः । अयं गणकयन्त्रपटुः पूर्वं CDAC संस्थायाम् आसीत् । अस्मिन् सन्दर्भे महाभागस्यास्य योगदानं सकार्तज्ञ्यं स्मरामः । एवं सत्यपि गन्तव्यः मार्गः सुदीर्घः अस्तीति जानीमः । गणकयन्त्रतन्त्रमनुसृत्य वेदानां शब्दानुक्रमणिका पदविभागः इत्यादीनां सम्पादनकर्मणि वाक्चापलं प्रदर्शयन्ति केचन । किन्तु वस्तुस्थितिर्भिन्ना वर्तते । प्रथमं तावत् संयुक्ताक्षराणां विभागज्ञानमपेक्षितम् । एतत्सम्पादनान्तरायो भूत्वा एकाक्षरस्तरेऽपि अपरिहृता जटिलाः समस्याः दरीदृश्यन्ते । अधुना गणकयन्त्रेषु प्रयुज्यमानाः अक्षरविन्यास-प्रक्रमाः त्रयः विद्यन्ते । 'CDAC पाठः' 'श्रीलिपिपाठः' 'प्रकाशकपाठ'श्चेति । अक्षरस्तरेऽपि एतेषु सामञ्जस्यं नास्ति । मण्डलम्, अष्टकम् इत्यादीनाम् अग्रशब्दानामपि विन्यासगरिमाणं(bold face) प्रयोक्तुमसमर्थाः स्मः । अन्यच्च, स्वरसहितवैदिकसंस्कृतस्य एक एव अक्षरविन्यासः(font) वर्तते । किन्तु आंग्लाक्षराणि परस्सहस्राणि विलसन्ति ।

**ग्रन्थस्वरूपस्य विवरणम्-** मुद्रितः ग्रन्थः चतुर्धा विभक्तः । प्रथमः - शाकलशाखायाः दशमण्डलात्मकः अथवा अष्टाष्टकयुक्तः पूर्णः ऋग्वेदपाठः विद्यतेऽस्मिन् प्रथमखण्डे । मूलपाठे १०२८ सूक्तानि सन्ति । अत्र वालखिल्यसूक्तानि अपि अन्तर्भवन्ति । एषु सूक्तेषु १०५५२ मन्त्राः विद्यन्ते । (सूक्तं - मन्त्रगुच्छः) । द्वितीयात् सप्तममण्डलान्तं यावत् गोत्रमण्डलानीत्युच्यन्ते । क्रमेण गृत्स्वमदः, विश्वामित्रः, वामदेवः, अत्रिः, भारद्वाजः, वसिष्ठः इति एतेषाम् ऋषीणां नाममुद्राङ्कितानि एतानि मण्डलानि । नवममण्डलं सोमदेवाय समर्पितम् । सोमस्तावत् आनन्दाधिदेवता । प्रथम-अष्टम-दशम-मण्डलेषु भिन्नभिन्नदेवतायुक्तानि भिन्नमन्त्रद्रष्टॄणां सूक्तानि सङ्गृहीतानि वर्तन्ते । अस्मिन् ग्रन्थे मूलपाठः देवनागरीलिप्या आंग्लसंख्यायुक्तः दत्तः । सूक्तसमुदायस्य परम्परागतः द्वेधा विभागः यः अस्ति स एव अत्रापि आदृतः । प्रथमस्तावत् मण्डलम् अनुवाकः इति । द्वितीयः - अष्टकम् अध्यायः इति ।

प्रत्यष्टकम् अष्टौ अध्यायाः सन्ति । एवं च ऋग्वेदे ६४ अध्यायाः अथवा ८५ अनुवाकाः सन्ति । एकैकस्य सूक्तस्य ऋषिः, छन्दः, देवता च रेखासम्पुटे(Box) दत्तः । सम्पुटस्य वामपार्श्वे उपरि दृश्यमाना संख्या सूक्ते मन्त्रसंख्यां निर्दिशति । दक्षिणपार्श्वे सूक्तस्य मण्डलानुवाकयोः संख्यानिर्देशः अस्ति ।

अस्य ग्रन्थस्य पाठः प्रमाणभूतात् प्राचीनपुस्तकात् स्वीकृतः । सुप्रसिद्धवेदविदुषा पण्डित-सातवळेकरमहाभागेन प्रदर्शितं यत् लक्षत्रयाक्षरात्मके विपुलवेदवाङ्मये, सत्यपि हस्तप्रतिकृतिवैविध्ये केवलं प्रतिकृतिद्वयमेव भेदं प्रकटयति । तत्रापि एकस्यैव अक्षरस्य सन्दर्भे नान्यत्र इति । पाठरक्षणे दृष्टा इयं निष्कृष्टता अतिविशिष्टमार्गानुसरणेनैव साध्या, नान्यथा इति स्पष्टम् । सेयं निष्कृष्टता अष्टविकृतियुक्तपद्धतिप्रयोगेण सम्पादिता वर्तते ।

**द्वितीयः खण्डः-** अस्मिन् खण्डे खिलसूक्तानां संग्रहः कृतः । अन्यान्यग्रन्थेषु अन्यान्यरीत्या संगृहीतानि खिलसूक्तानि । तत्र समानमन्त्राः अपि वर्तन्ते । वैदिकसंशोधनमण्डलेन (पुणे), डा. काशीकर महोदयेन च सम्पादितः ग्रन्थः अत्र आदृतः । वै.सं.मं. ग्रन्थस्य प्रास्ताविके उक्तं यत् खिलसूक्तानि इदानीम् अनुपलभ्यमानाभ्यः बाष्कल-आश्वलायन-शांखायन/सांख्यायननाम्नीभ्यः चतुश्शाखाभ्यः उद्धृतानि इति । अत्र प्रमाणं तावत् ब्राह्मणग्रन्थाः बृहद्देवता च खिलसूक्तान्तर्गतानेव मन्त्रान् उदाहरन्तीति । अनेन एतदुक्तं भवति यत् खिलसूक्तानि ऋग्वेदस्य प्रमाणभूतम् अङ्गं, न तु कालान्तरे प्रक्षिप्तानि । खिलेषु सुप्रसिद्धानि नित्यपारायणोपयुक्तानि च श्रीसूक्तं, मेधासूक्तं, सौपर्णसूक्तं, शिवसङ्कल्पहृदयमित्यादीनि अन्तर्भवन्ति । निविदः, पुरोरुचः, प्रैषाः इत्यादीनि खिलसूक्तानि पञ्चमाध्यायात् सप्तमपर्यन्तं विद्यमानानि परमप्राचीनानीति गृह्यन्ते । ८-४९ तः ८-५९ पर्यन्तं दश अध्यायान्तःपातीनि वालखिल्यसूक्तानि तृतीयाध्यायस्य खिलभागेऽपि पठितानि । एतेषां स्वरक्रमस्तु प्रसिद्धे ऋग्वेदपाठे भिन्नः खिलभागे च भिन्नः भवति । अस्मिन् ग्रन्थे अदृष्टं वाक्यं, त्यक्ताः शब्दाः वै.सं.मं.पाठेऽपि न सन्ति इति विज्ञापयामः । खिलसूक्तानां स्वरः अन्यान्यपाठेषु व्यत्यस्तः अस्ति । वै.सं.मं.द्वारा सम्पादिते ग्रन्थे पाठभागस्य यथा प्रामुख्यं वर्तते तथा स्वरविचारे नास्ति । तथापि तत्रत्यः एव स्वरक्रमः अस्माभिरपि अनुसृतः ।

**तृतीयः खण्डः** - अस्मिन् शतस्य ऋग्वेदमन्त्राणाम् आंग्लभाषानुवादः व्याख्यानं च निवेशितम् । अयं च भागः श्री एम्.पि. पण्डितमहाभागानां ''Gems from the Vedas'' इत्यस्मात् ग्रन्थादुद्धृतः वर्तते । ऋग्वेदान्तर्गततत्त्वविशेषाणाम् औन्नत्यस्य गाम्भीर्यस्य च उपलक्षणभूतोऽयं भागः ऋग्वेदमवलम्ब्य श्री अरबिन्दोश्रीकपालिशास्त्रिभिः रचितानां मूलग्रन्थानामध्ययनार्थं सहृदयान् आकर्षेदिति आशास्यते । भागस्यास्य अस्मिन् ग्रन्थे पुनर्मुद्रणार्थम् अङ्गीकारं दत्तवतः **'दीप्तिविश्वस्तसंस्थायाः'** (trust) श्री श्रद्धालु-रानडेमहाभागस्य अधमर्णा वयमिति सूचयामः ।

**चतुर्थः खण्डः** - अत्र प्रास्ताविकः निबन्धः कश्चन दत्तः यस्मिन् ऋग्वेददर्शनं प्राकाश्यतां नीतम् । वस्तुवैविध्यं प्रयोजनापेक्षां च मनसि कृत्वा प्रमुखमन्त्राणामनुक्रमणिकाऽपि सज्जीकृता । अस्मिन् निबन्धे ऋग्वेदमधिकृत्य असकृदुद्भावितानां सन्देहानां पृष्टानां प्रश्नानां च समाधानं दत्तमस्ति । समाधानं च

अर्वाचीनवेदविद्याप्रवरैः दयानन्द-वासिष्ठमुनि-श्रीअरविन्द-कपालिशास्त्रिभिः, प्राज्ञैः यास्क-आनन्दतीर्थ-राघवेन्द्रस्वामिभिः च प्रदर्शितपद्धतिप्रकाशमवलम्ब्य दातुमत्र प्रयत्नः विहितः ।

**इदानीं चत्वारः प्रश्नाः प्रतिपाद्यन्ते ।**

१. वेदपुरुषेण प्रकाश्यमानं सत् प्रत्येकं सूक्तं केनचित् ऋषिणा दृष्टमिति परम्पराभिप्रायश्चेत् उच्यते - ऋषिः किं सम्पूर्णं सूक्तं दृष्टवान् ? ओमित्युक्ते सति, लिपिविहीने तस्मिन् प्राचीनकाले कथं वा द्रष्टुं शक्यम् ?

२. केचन अभिप्रयन्ति यत् ऋग्वेदः कर्मकाण्डमात्रयुक्तः । तत्त्वज्ञानं च तत्र नास्त्येव इति । अन्ये केचन वदन्ति यत् प्राचीनज्ञानविज्ञानसमुदायभूतेषु उपनिषत्सु वर्तमानं तत्त्वज्ञानं बोधवाक्यानि च ऋग्वेदे अन्यवेदानां च संहिताभागेऽपि विद्यते एव इति । अत्र निश्चयः कः ?

३. ऋग्वेदे अग्निदेवताकाः २००० मन्त्राः सन्तीति उच्यते । पञ्चभूतेषु अन्यतमम् अग्निमधिकृत्य कथं वा एतावन्तः मन्त्राः स्युः चर्वितचर्वणं विना ? अग्निशब्दस्य अन्यः कोऽपि अन्तरार्थः भवेद्वा ?

४. ऋग्वेदोक्ता सरस्वती नदी वा देवता वा ? यदि नदी तर्हि महानदी उत क्षुद्रनदी ? कथं वा केवलं सरस्वती कालान्तरे ज्ञानाधिष्ठात्री देवतेति परिगणिता, न तु गङ्गा यापि नदीदेवता इति प्रसिद्धा पूज्या च ? ऋग्वेदे सरस्वत्याः स्थानं किम् ? तत्रैव ज्ञानाधिदेवतेति सम्मानिता किम् ?

'भारतीय-इतिहासग्रन्थाः उच्चैरुद्घोषयन्ति यत् ऋग्वेदः भारतं प्रति विदेशादागतैः आर्यैः निबद्धः इति । एते च आर्याः भारतं वायव्यदिशा प्रविश्य तदा उच्छ्रायस्थितिमारूढां तत्रत्यां सिन्धूसंस्कृतिं सर्वथा व्यनाशयन् । तत्रत्यं 'द्राविड'नामकं मूलनिवासि-जनसमुदायं च ततः निस्कासयन्; ते च द्राविडाः भारतस्य दक्षिणां दिशम् अध्यवसन्' इत्यादिरूपेण वादाः श्रूयन्ते। आर्य-द्राविड-जनसमुदाययोर्मध्ये प्रवृत्तस्य संघर्षस्य युद्धस्य वा ऋग्वेदे प्रमाणं किमस्ति? 'द्राविड' इति शब्दः ऋग्वेदे लभ्यते उत इतरसंहितासु ?

प्रायः भारतीयशास्त्रकोविदाः पाश्चात्त्याः विद्वांसः ये १९ शतके ऋग्वेदमधिकृत्य बहुग्रन्थनिर्माणे रताः आसन् ते एतान् प्रश्नान् नोद्भावयन्ति । उद्भावितानपि नोत्तरयन्ति यतः तदभिप्रायानुसारम् ऋग्वेदवाङ्मयं बालिशं ग्राम्यं प्राकृतप्रियं च विद्यते । प्रकृतः लेखः ऋग्वेदीयमन्त्राधारेणैव एतादृशानां प्रश्नानाम् उत्तरं दातुं प्रयतते । तदन्तर्गतं तत्त्वज्ञानमेव उपनिषदि ऋषिभिः प्रपञ्चितमित्यपि च प्रमाणीकरोति ।

उपनिषत्सु ऋग्वेदान्तर्गतस्य दर्शनस्य विरोधः कुत्रापि नास्ति । अपि तु तस्यैव सत्यस्य पुनः प्रतिपादनम् इतोऽप्यतिशयितेन रूपेण कृतमस्ति । उपनिषत्सु तत्र तत्र उल्लिखितानां प्रायः २० ऋङ्मन्त्राणां पट्टिका अनुक्रमणिकायां प्रदर्शिता च एतत् समर्थयति पुष्टीकरोति च ।

**स्वरक्रमः** - अस्मिन् ग्रन्थे प्रयुक्तं स्वरनिर्देशक्रममुद्दिश्य किञ्चित् वक्तुं समयोऽयं प्राप्तः । स्वरस्य त्रयः प्रभेदाः दृश्यन्ते । उदात्तः, अनुदात्तः, स्वरितश्चेति । उदात्तः स्वरः न निर्दिश्यते (अनिर्दिष्टः) । अनुदात्तः अधोरेखया स्वरितश्च उपरितनलम्बरेखया च सूच्येते । उदा - अ॒ग्नयें । तथापि अनिर्दिष्टाः सर्वेऽपि उदात्ताः न भवन्ति । तादृशाः १-३ इति संज्ञासंख्यानिर्देशेन स्पष्टीकृताः स्वरितानन्तरं विद्यमानस्य अनुदात्तस्य उदात्तत्त्वग्रहणं निवारयितुं सोऽनुदात्तः पूर्ववर्णात् विभक्तः मध्ये १॒॑ इत्यपि संख्या विनिवेशिता, स्वरितश्च लम्बरेखया न अङ्कितः । उदा- अ॒प्स्व १॒॑ न्तः(ऋ.सं. १.२३.१९) इति वा ३॒॑ इत्यत्र यथा स्वरितस्य अधोरेखाङ्कनेन वा क्वे॒ ३॒॑ दानीम् (ऋ.सं. १.३५.७) । उदात्तमनुसरन् अनुदात्तः सर्वदा अङ्कितः । यथा- अ॒ग्निम्, क॒न्या॑ । वाक्यारम्भे विद्यमानाः सर्वेऽपि अनुदात्ताः (एकस्मादधिकाः) अधोरेखया निर्दिष्टाः वर्तन्ते। उदा. अ॒नु॒का॒मम् (ऋ.सं. १.१७.३) । विश्वेश्वरानन्दवैदिकसंशोधन-संस्थया प्रकाशितस्य वेदकोशस्य (Vedic Concordance) प्रथमसम्पुटात् उपरितनवाक्यानि उद्धृतानि वर्तन्ते । तत्र इदमपि अभिप्रेतं यत् इतरवेदसंहितासु स्वराङ्कनक्रमः खिलसूक्तेभ्यः भिद्यते इति ।

**उपकारस्मरणम्** - ग्रन्थोऽयं श्रीमाधवपण्डितवर्याय (१९१८-१९९३) समर्पितः अस्ति । यतः अयं महाभागः अस्मान् वेदविद्यादीक्षितान् कृत्वा अस्मासु वेदविषयकजिज्ञासाम् उदपादयत् श्री अरविन्दमहर्षीणां श्रीमातुः श्रीकपालिशास्त्रिणां च साहित्यसौधस्य परिचयप्रदानेन स्वीयकृतिद्वारापि । वेदवाङ्मयस्य गणकयन्त्रस्थीकरणकर्मणि अपि पण्डितमहोदयस्य मङ्गलाशीर्भिः वर्धिता वयमिति सानन्दमुद्घोषयामः ।

श्रीरामकृष्णमठस्य स्वामिनां निःश्रेयसानन्दानाम् अधमर्णा वयं, यतः एते उपनिषद्ग्रन्थान् अध्याप्य अन्यान्यवेदग्रन्थानां मध्ये ऐक्यं कथं प्रतिपादनीयम् इत्येतं महत्त्वपूर्णम् अंशं बोधितवन्तः ।

१९९३ जनवरीमासे CDAC संस्थया सह प्रवर्तितस्य व्यवहारस्यानुगुणं ऋग्वेदस्य दशमण्डलानां गणकयन्त्रप्रतिकृतिः वि.पि. रामानुजन्महाभागस्य नेतृत्वे सम्पादिता । अस्याः शुद्धतासम्पादनकर्मणि महान्तं सहयोगं प्रदत्तवद्भ्यः कु. चंद्रिका हेच्.वि., श्रीमती देविका, श्रीमती चन्द्रा शडगोपन्, श्रीमती कुमुदवल्ली, श्री पि. श्रीनिवासन् इत्येतेभ्यः महाभागेभ्यः कृतज्ञाः स्मः । **वागर्थप्रिण्टानिक्स्** इत्येतैः खिलभागस्य गणकयन्त्रप्रतिकृतिकरणकर्मणि अल्पावधावेव प्रशंसार्हं कार्यं कृतमिति तान् प्रति धन्यवादान् समर्पयामः । ग्रन्थभागस्य शोधनकार्ये अन्यान्येभ्यः बहुविधं साहाय्यं प्राप्तमस्माभिः । तेषु उल्लेखार्हाः डा. एस्.आर्. लीला, संस्कृतविभागमुख्या, NMKRV महाविद्यालयः, बेङ्गलूरु., प्राचार्या बि.जि. श्रीलक्ष्मी महाभागा, बेङ्गलूरुविश्वविद्यालयः, पं. धाली नरसिंहभट्टमहोदयः च । लीलामहाभागा तु न केवलम् अस्य ग्रन्थस्य कृते अस्माभिः आंग्लभाषया कृतं प्रास्ताविकं संस्कृतेन अनूदितवती, परं तु नैकविधसाहाय्यमपि प्रादात्। एवम् अन्यान्यरीत्या एतत्सिद्धिं समधिगन्तुम् साह्यहस्तं दत्तवद्भ्यः एतेभ्यः सर्वेभ्यः हार्दं नमोवाकं प्रशास्महे ।

व्यवसायेऽस्मिन् वयं प्रोत्साहिताः प्रेरिताश्च सन्ततम् । प्रेरितारश्च परमादरणीयाः अस्मद्गुरवः उत्तरक्यालिफोर्नियावेदान्तसंघस्य प्रमुखाः श्रीरामकृष्णमठस्य स्वामिनः श्रीप्रबुद्धानन्दाः, बेङ्गलूरु-विश्वविद्यालयस्य प्राक्तन-उपकुलपतयः डा. एच्. नरसिंहय्यमहाभागाः, IISc भूतपूर्वप्राचार्याः डा. जि.वि. अनन्त अय्यर् महाभागाः च; स्वदेशे विदेशेषु च प्रगताध्यायने निरताः प्राक्तनाः वर्तमानाः च अस्मत्-प्रियच्छात्राः; भारते अमेरिकादेशे च विद्यमानाः अस्मत्सहोद्योगिनः, विशिष्य कु. श्यामा तथा डा. पि. रामचन्द्रमहाभागाः, अरबिन्दो- आश्रमस्य वासन्तीराव्महोदया, श्री आर्.एस्. कश्यपमहोदयः, तथा अन्ये च अस्मत्कुटुम्बसदस्याः ।

वैदिकसंशोधनमण्डलम्, पुणे, एतेभ्योऽपि वयं कृतज्ञाः स्मः यतः खिलपाठः तदीयग्रन्थादेव स्वीकृतः वर्तते ।

मुद्रणकार्यं सुरम्यं यथा तथा सम्पन्नमिति कारणात् अन्ते, **परिमलामुद्रणालयः** तत्रस्थः प्रभाकर-महोदयश्चापि धन्यवादार्हः ।

**प्रार्थना** - अस्मत्पाठकेषु विज्ञाप्यते यत् ते मुद्रणस्खालित्यम्, इतरे दोषाः, पुस्तकस्य विन्यासः, विषयसङ्ग्रहः, निरूपणाक्रमः, इत्याद्यंशेषु स्वीयान् अभिप्रायान् निस्सङ्कोचं प्रकटयितुम् अर्हन्तीति । तथा इतःपरं कन्नड-तेलुगु-बेङ्गालि-इत्यादिभिः भारतीयलिपिभिः अपि वेदवाङ्मयं गणकयन्त्रस्थीकरणीयम् इत्यस्ति अस्माकं सङ्कल्पः । अतः तद्विषये अपि स्वीयं सचिन्तनं दद्युः । अस्माकं सङ्केतः-

**Prof. S. Sadagopan,**
Indian Institute of Management, Bannerghatta Road, Bangalore-560076, India.
Ph.: (80) 6651340, e-mail: ss@iimb.ernet.in.

**Prof. R.L. Kashyap,**
109, 8th B Main Road, Jayanagar, IV Block,
Bangalore-560011, India. Ph.: (80) 646471.

**Prof. R.L. Kashyap,**
School of ECE, Purdue University, West Lafayette, In, 47906, USA.
Ph.: 765 4631935, e-mail : kashyap@ecn.purdue.edu.

March 29, 1998
Ugadi

**R.L. Kashyap**
**S. Sadagopan**

## प्राक्कथनम्

'अनन्ता वै वेदाः' इति सुप्रसिद्धा खलु सूक्तिः । वेदराशयः दिव्यप्रभवाः लिप्युपाधिवर्जिताः अपौरुषेयाश्च । सत्यस्वरूपाणां वेदानां प्रामाण्यं स्वतः सिद्धम् । दिव्यम् उत मानुषं वा पुरुषविशेषम् अनाश्रित्य तिष्ठति वेदवाङ्मयस्य प्रामाण्यम् । वेदाः परब्रह्मणः पूर्णज्ञानप्रतिनिधयः इति प्रथिताः ।

अध्यात्मप्रपञ्चे उत्पद्यमानानां सर्वविधमीमांसानां तत्त्वजिज्ञासानां च उत्पत्तिस्थानं वेदवाङ्मयमित्यत्र न कापि संशीतिर्वर्तते कस्यापि । यतः सृष्टिमूलं, जगतः कर्तृभर्तृलयकर्तॄणां स्वरूपं, जीवात्मनः स्थितिः तद्गतिश्च, पुनर्जन्म, लोकान्तरवासः इत्यादीनां सूक्ष्मांशानां विवरणं वेदेषु समुपलभ्यते । वेदराशिः न केवलं एतादृशसूक्ष्मातिसूक्ष्माणां गहनतत्त्वानाम् उद्बोधकः, परं तु नित्यजीवनयात्रायाः अपि विधिविधाननिरूपकः अस्ति । नित्यनैमित्तिककर्माणि प्रदर्श्य, कृत्याकृत्यं विविच्य, नीतियुक्तं जीवनविधानम् अधिकृत्य मार्गदर्शनं च कृत्वा, विवेकी मनुष्यः प्रेयः श्रेयश्च साधयितुं साहाय्यं समुपकल्पयन्ति वेदाः । निःश्रेयसकारिणां भक्तिप्रीतिविरक्तीनां शमदमादि-आत्मसम्पत्तीनां च प्रवर्तकाः वेदप्रतिपादिताः दैवांशाः ।

वेदवाङ्मयस्य पारम्यं तावत् तदीयम् अनुपमं ज्ञानस्रोतः एव । सच्चित्स्वरूपस्य परमात्मनः ज्ञानकरणः वेदाः ।

प्राञ्चाः प्रतिभाप्रकाशविशिष्टाः ऋषयः अन्तश्चक्षुषा वस्त्वन्तरार्थग्रहणे कुशलिनः सृष्टिमूलं जगत्स्वरूपं च दृष्ट्वा तमेव लोकहितार्थम् उच्चैः उद्घोषयामासुः, एतेषाम् आद्यानाम् ऋषीणां प्रामाण्यं तावत् काले काले तत्र तत्र प्रकटीभूतैः ज्ञानिभिः सत्यशोधकैश्च वारं वारं परीक्षितं वर्तते । मेरुतुल्यस्य वेदराशेः परिचयस्तावत् मनुष्यजीवनं सार्थकं ध्येययुक्तं च कृत्वा सन्मार्गे प्रवर्तयति । अन्ते चरमं लक्ष्यं मोक्षं च साधयति ।

अस्मिन् ऋग्वेदपरिचयात्मके स्तुत्ये कर्मणि आत्मानौ व्यापारयन्तौ प्राचार्यौ काश्यप-षडगोपन्महोदयौ नितरां सभाजनीयौ । वेदवाङ्मयस्य प्रमुखभागः ऋग्वेदः इदानीम् अधिकाधिकजनानां हस्ते भवेत् मुद्रितपुस्तकरूपेण, तथा जगत्संवहनजाले (Internet) प्रवेशं प्राप्य च इति य एषः एतयोः निरन्तरप्रयत्नशीलयोः सङ्कल्पः आसीत् तस्य फलम् एतत् ।

अनेन कृते प्रयत्नेऽपि अनुपलभ्यमानेभ्यः वेदेभ्यः सामान्यजनानां प्रयोजनं नास्तीति आक्षेपः इदानीम्। अपाकृतः

काश्यप-षडगोपन्महाभागाभ्यां ग्रन्थं मुद्राप्य साहित्यसौलभ्यं समुपकल्पितम् एव । अपरश्च महान् गुणः अस्य मुद्रितग्रन्थस्य विद्यते । वेदसम्बद्धाः नैकविधाः प्रश्नाः जिज्ञासुभिः, आत्मचिन्तनरतैः, पण्डितैः, पामरैश्च तदा तदा उद्भाविताः पृष्टाश्च अत्र उत्तरिताः सन्ति, येन ग्रन्थस्यास्य उपयुक्तता द्विगुणिता ।

महाकार्यार्थं प्रवृत्तयोः ग्रन्थसम्पादकयोः कार्यं परब्रह्मणः कृपाविशेषेण सिद्धिमवाप्नुयात् पाठकसहृदयाश्च ज्ञानम् आनन्दं च विन्देयुरिति हार्दमाशास्महे ।

Feb. 6-1998

**स्वामी प्रबुद्धानन्दः**
वेदान्तसंघः
उत्तर-क्यालिफोर्निया, सान्फ्रान्सिस्को